PSBB Learning Leadership Academy
Bangalore-2021-22

**CLASS-VIII  Sub:-Sanskrit II Lang**

**ANNUAL  EXAM**

**REVISION  WORKSHEET**

---

भागः 'अ'
( बहुविकल्प-प्रश्नाः )
( अनुप्रयुक्त-व्याकरणम् )

---

I.उचितैः शब्दरूपैः रिक्तस्थानानि पूरयत।

1)---------- हस्ते खड्गः अस्ति।( राजन् )

2)भवान्----इष्टं किं? इति वदतु ।(आत्मन्)

3)जनाः -----विश्वासं प्रदर्शयन्ति।(युष्मद् )

4)माता -------विना देवालयं न गच्छति।
( अस्मद् )

5)श्रीरामः -------- श्रेष्ठतमः। ( राजन् )

II.उचितैः लकाररूपैः रिक्तस्थानानि पूरयत।

1)सिंहौ गुहां ---------। (प्र+विश् - लङ् )

2)युवां विदेशे --------।(नि+वस्-लट्)

3)पक्षिणौ आकाशे-----।(उत्+पत्-लङ्)

4)न्यायाधीशः एवं -------।(आ+दिश्+लट्)

5)पुत्र्यः मातरं -------।( प्र+नम् -लङ्)

III.धातु-प्रत्ययानां संयोगं विभागं वा कुरुत।

1)अहं गृहे स्थातुम् इच्छामि।
--------

2)महिले जलं --------।(पा + क्तवतु )

3)पितामहः आसनात् ---------- बहिः अगच्छत्। ( उत्+ स्था + ल्यप् )

4)पिता फलानि आनेतुम् गतवान्।
---------

5)वयं पुस्तकानि --------।( नी+क्तवतु )

IV.सन्धिं सन्धिविच्छेदं वा कुरुत।

1)मातुराज्ञा 2)बन्धुः+ते 3)काकोऽस्ति

4)मुनेः+आशीर्वादः 5)बालाश्च

V.उचितैः अव्ययैः रिक्तस्थानानि पूरयत।

1)छात्र! त्वं बुद्धिमान् असि,----- न पठसि?

2)------- मम मित्रं श्वः आगमिष्यति।

3) ------- शिक्षणं ------ जीवनम्।

4)----- प्रातः ----- पक्षिणः कूजन्ति।

5)त्वम् ----- मम मित्रम् असि।

( प्रायः , एव , यदा - तदा , यदि - तर्हि , किमर्थम् )

VI.सङ्ख्यावाचकपदानि संस्कृते लिखत।

क) 8 ख) 34 ग) 86

घ) 18 ङ) 98

VII.पर्यायपदैः सह मेलनं कुरुत।

---

' आ ' भागः

( वर्णनात्मकाः प्रश्नाः)

( अपठितावबोधनम् )

---

**VIII.**गद्यभागं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत।

**13** ईश्वरस्य भक्तः एकः बालकः आसीत्। एकदा ईश्वरः स्वप्ने तमकथयत्–'त्वं तु मम भक्तः असि, अतः मम एकं कार्यं कुरु। तव गृहात् बहिः एका शिला अस्ति। तां शिलां तत्स्थानात् अपसारय।' तस्य बालकस्य ईश्वरे दृढविश्वासः आसीत्। अतः अविचार्य एव सः ईश्वरादेशम् अमन्यत। प्रातःकाले उत्थाय सः बृहच्छिलाम् अपश्यत्। ईश्वरं स्मृत्वा बालकः तस्मिन् कार्ये नियुक्तः जातः। तदा तं दृष्ट्वा जनाः अकथयन्–"अस्याः शिलायाः अपसारणम् असम्भवम्, अतः वृथा परिश्रमं मा कुरु।" परं सः बालकः तस्मिन् कार्ये संलग्नः अभवत्। इत्थं कार्यं कुर्वन् तस्य शरीरं तु बलवत् अभवत् परं सः निराशः जातः। रात्रौ स्वप्ने पुनरागतम् ईश्वरं सः अकथयत्-मया कृतः श्रमः तु व्यर्थः जातः। शिला तु तत्रैव वर्तते। स्मितमानः ईश्वरः प्रत्यवदत्–संसारेऽस्मिन् किमपि कार्यं तु निष्फलं न भवति। पश्य, निर्बलः त्वं अधुना सबलः असि। जीवने कदाचित् परोक्षः लाभः नरः लभते। *(CBSE 2017)*

**प्रश्नाः–**

**I. एकपदेन उत्तरत–**

(*i*) *कं स्मृत्वा बालकः कार्यम् अकरोत्?*

(*ii*) *बलवत् किम् अभवत्?*

**II. पूर्णवाक्येन उत्तरत–**

(*i*) *जनाः किम् अकथयन्?*

(*ii*) *स्वप्ने आगतम् ईश्वरं बालकः किमकथयत्?*

**III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत–**

(*i*) *'अमन्यत्' इति क्रियापदस्य कर्तृपदं किम्?*

(क) ईश्वरः (ख) जनः

(ग) भक्तः (घ) सः (बालकः)

(*ii*) *'विस्मृत्य' इति पदस्य किं विपरीतपदम् अत्र प्रयुक्तम्?*

(क) अविचार्य (ख) उत्थाय

(ग) स्मृत्वा (घ) दृष्ट्वा


(*iii*) *'स्मितमानः' इति पदं कस्य विशेषणपदम् अस्ति?*

(क) बालकस्य (ख) भक्तस्य

(ग) जनस्य (घ) ईश्वरस्य

" रचनात्मकं कार्यम् "

IX.चित्रं दृष्ट्वा मञ्जूषायाः शब्दानां सहायतया त्रीणि वाक्यानि लिखत।




X.पत्रलेखनम्।

XI.संस्कृते अनुवादं कुरुत।

1)Two ladies are washing clothes on the bank of the river.

2)Varun ! how is your health ?

3)Elephants ate leaves of the tree.

4)My friend came from America.

5)An eagle is flying in the sky.

' पठितावबोधनम् '

XII.अधोदत्तं अनुच्छेदं पठित्वा प्रश्नानाम्
उत्तराणि लिखत।

एवं वृक्षाणाम् उपयोगितां ज्ञात्वा अस्माभिः यावच्छक्यं वृक्षाणाम् आरोपणं कर्त्तव्यम्। भौतिकदृष्ट्या न किञ्चिदपि अन्यत् एतेन समानं पुण्यं कर्म विद्यते। आधुनिके वैज्ञानिके औद्योगिके च युगे वृक्षाः एव पर्यावरणस्य प्रदूषणमवरोद्धुम् अस्मभ्यं च जीवनस्य उपयोगीनि वस्तूनि प्रदातुं समर्थाः सन्ति।

प्रश्नाः

अ)एकपदेन उत्तरत।

1)अस्माभिः केषां आरोपणं कर्तव्यम् ?

2)के अस्मभ्यं उपयोगीनि वस्तूनि यच्छन्ति?

आ)पूर्णवाक्येन उत्तरत।

1)किं ज्ञात्वा अस्माभिः किं कर्तव्यम्?

इ)भाषिककार्यम्।

1)'उपयोगीनि वस्तूनि ' एतयोः विशेष्यपदं किम् ?

2)'पापम् ' इत्यस्य विलोमपदं किम् ?

XIII.श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत।

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।

चत्वारि तस्य वर्धन्ते आयुर्विद्या यशोबलम्।।

प्रश्नाः

अ)एकपदेन उत्तरत।

1) कस्य चत्वारि वर्धन्ते ?

2)कति गुणाः वर्धन्ते?

आ)पूर्णवाक्येन उत्तरत।
1)चत्वारः गुणाः के ?

इ)भाषिक-कार्यम्।
1)'वृद्धोपसेविनः ' अत्र का विभक्तिः?
2)' आयुर्विद्या ' अत्र सन्धिविभागं कुरुत।

XIV.श्लोकं पठित्वा अन्वयं पूर्णरूपेण लिखत।

XV.रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत।

1)फुफ्फुसं शरीरे कार्यं करोति।
------
2)वृक्षाणां रक्षणं पुण्यं कर्म वर्तते।
-----
3)वृक्षाः भूमेः उर्वरतायाः रक्षणं कुर्वन्ति।
-----
4)सुबुद्धिः बुद्धिमान् आसीत्।
---------
5)भारतम् अस्माकं देशः ।
---------

XVI.अधोदत्तवाक्यानि कथाक्रमानुसारं उत्तरपुस्तिकायां पुनः लिखत।

1)तृतीयः जीवं सञ्चारयितुं उद्यतोऽभवत्।

2)न त्वं राज्ञः धनं लब्धुं योग्योऽसि।

3)तर्हि प्रतीक्षस्व क्षणं यावदहं वृक्षम्

आरोहामि।

4)ते मृतसिंहस्य अस्थीनि अपश्यन् ।

5)ते परस्परं मित्राणि आसन्।

6)अद्य विद्याप्रत्ययः क्रियताम्।

========================